("स्यादाघामनकः घोरण्टः कटकोलः पतद्ग्रहः"।)

कटखादकं, त्रि, (कटं तृणादिकं सर्व्वमपि खादति इत्यर्थः। कट्+खाद्+ण्वुल्। सर्व्वभक्षम्।) खादकम्। भक्षकम्। इति मेदिनी॥

कटखादकः, पुं, (कटस्य आवरणस्य खं मध्यस्थितच्छिद्रं अस्ति। कट+ख+अद्+ण्वुल्।) काचकलसः। काकः। जम्बूकः। इति मेदिनी॥ (कटं शवं खादतीति व्युत्पत्त्या शवखादके त्रि।)

कटङ्कटः, पुं, (कटं शवं कटति ज्वालया आवृणोतीति। कट+कट्+बाहुलकात् खच्।) अग्निः। यथा,—

"कटङ्कटाय भीमाय नमः पच्यपचाय च।
अघोरघोररूपाय घोरघोरतराय च"॥

इति वह्निपुराणे अग्निस्तवनामाध्यायः॥

कटङ्कटेरी, स्त्री, (कटङ्कटं वह्निजं सुवर्णं तत्कान्तिमितिशेषः ईरयति प्रापयति ज्ञापयति वात्मानं सुवर्णकान्तितुल्यपीतवर्णत्वात्। कटङ्कट+ईर गतौ+अण्। ङीप् गौरादित्वात् ङीष् वा।) हरिद्रा। इति त्रिकाण्डशेषः॥ दारुहरिद्रा। इति रत्नमाला॥

कटप्रूः, पुं, (कटे श्मशाने प्रवते। कटं कटेन वा प्रवते। प्रुङ् गतौ क्विप् निपातनात् दीर्घः। पां। ३।२। १७। "क्विब्वचिप्रच्छिश्रिस्रुद्रुप्रुज्वां दीर्घोऽसम्प्रसारणञ्च"।) उणां २। ५७।) महादेवः। राक्षसः। विद्याधरः। अक्षदेवनः। इति मेदिनी। कीटः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

कटभङ्गः पुं, (कटानां शस्यानां ओषधीनामितियावत् हस्तेन भङ्गः छेदनम्। कटस्य सैन्यसंघस्य भङ्गः यस्मात् हेतोः सैन्यभङ्गस्तु राजमरणहेतुरेव।) शस्यानां हस्तच्छेदः। हात दिया शस्य छेँड़ा कुड़न इत्यादि भाषा। नृपात्ययः। राजविनाशः। इति मेदिनी॥

कटभी, स्त्री, (कटवद् भाति। कट+भा+डः। गौरादित्वात् ङीष्।) ज्योतिष्मती लता। इत्यमरः। २।४।१५०॥ नया फटकी इति भाषा। अपराजिता। वृक्षभेदः। तत्पर्य्यायः। नाभिका २ शौण्डी ३ पाटली ४ किणिही ५ मधुरेणुः ६ क्षुद्रश्यामा ७ कैडर्य्यः ८ श्यामला ९। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। गुल्मविषाध्मानशूलदोषनाशित्वम्। वातकफाजीर्णरोगशमताकारित्वम्। श्वेता चेत् गुणयुक्तत्वञ्च। "तत्फलं तद्गुणं ज्ञेयं विशेषात् कफशुक्रहृत्"। इति राजनिर्घण्टः॥ (यथा भावप्रकाशे।

"कटभी तु प्रमेहार्शोनाडीव्रणविषक्रिमीन्।
हन्त्युष्णा कफकुष्ठघ्नी कटुरुष्णा च कीर्त्तिता"॥)

वृक्षभेदः। काँटाशिरीष इति ख्यातः। इति रत्नमाला॥

कटमालिनी, स्त्री, (कटानां किण्वाद्योषधीनां माला साधनत्वेनास्ति अस्याः अस्त्यर्थे इनिः ततो ङीप्। मदिरामादकतायास्तु किण्वाद्योषधीगणप्रभवत्वात्। "मद्यादौ किण्वशक्तिवत्"। इति चार्व्वाकदर्शने १ अध्यायः।) मदिरा। इति शब्दमाला॥

कटम्बः, पुं, (कटतीति "कृकदिकडिकटिभ्योऽम्बच्"। उणां। ४। ८२। इति अम्बच् धातूनामनेकार्थत्वात् अत्र वादनेऽपि।) वाद्यभेदः। (कव्यते आव्रियते शत्रुरनेनेति करणे अम्बच्।) बाणः। इत्युणादिकोषः॥

कटम्बरा, स्त्री, (कटं गुणातिशयम् वृणोति धारयतीति। वृ+अच्+टाप् च।) कटुकी। इत्यमरः। २।४।८५॥ कटम्भरा इति च पाठः॥

कटम्भरः, पुं, (कटं गुणातिशयं बिभर्त्ति। भृ+धारणपोषणयोः संज्ञायां भृतॄवृजिधारिसहितपिदमीति खच् मुम् च पां ३।२।४६।) श्योनाकवृक्षः। इति राजनिर्घण्टः॥ कटभीवृक्षः। इति वैद्यकम्॥

कटम्भरा, स्त्री, (कटं बिभर्त्ति या। भृ+खच् मुम् टाप् च।) राजबला। इत्यमरः। २।४।१५३॥ प्रसारणी। गन्धभादालिया इति भाषा। रोहिणी। कटकी इति भाषा। हस्तिनी। कलम्बिका। गोला। वर्षाभूः। मूर्व्वा। इति मेदिनी॥

कटव्रणः, पुं, (कटः उत्कटो व्रणो युद्धक्षतरूस्य।) भीमसेनः। इति त्रिकाण्डशेषः॥

कटशर्करा, स्त्री, (कटः नलः मिष्टरसत्वात् शर्करेव यस्याः।) गाङ्गेष्टीलता। इति हारावली॥ नाटा इति ख्याता।

कटाकुः पुं, (कटति कष्टेन जीविकां निर्व्वाहयति॥ कट् कृच्छ्रजीवने "कटिकषिभ्यां काकुः" उणां ३। ७७। इति काकुः।) पक्षी। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

कटाक्षः, पुं, (कटावतिशयितौ अक्षिणी यत्र। कट+अक्षिन्+षच्। यद्वा कटं गण्डं अक्षति व्याप्नोति। अक्षू व्याप्तौ+अच् कर्म्मण्यण् वा।) अपाङ्गदर्शनम्। आड़चके देखन इति भाषा। इत्यमरः। २।६।९४॥ (यथा, मेघदूते ३७। "आमोक्ष्यन्ति त्वयि मधुकरश्रेणिदीर्घान् कटाक्षान्"॥)

कटायनं, स्त्री, (कटस्य खनामख्याततृणस्य अयनं उत्पत्तिस्थानम्।) वीरणम्। इति शब्दरत्नावली॥

कटारः, पुं, (कटं कन्दर्पमदं ऋच्छति। कट+ऋ+अण्।) नागरः। कामी। इति शब्दमाला।

कटाहः, पुं, (कटं उत्तापादिकं आहन्ति निवारयतीति। कट+आ+हन्+ड।) कूर्म्मकर्परः॥ द्वीपप्रभेदः। (कटं कटुगन्धादिकं आहन्ति तैलादिकटुगन्धः आहन्यतेऽत्र वा।) तैलादिपाकपात्रम्। (कटं शत्रुं आहन्त्यसौ जायमानविषाणाग्रमहिषीशावकः। इति मेदिनी॥ (कटः पापी आहन्यते यत्र।) नरकः। इति हारावली॥ कर्पूरः। इति जटाधरः॥ कूपः। इति शब्दरत्नावली॥ (यथा सिद्धान्तकौमुद्याम्। ५।१।५२। "प्रस्थं सम्भवति प्रास्थिकः कटाहः"॥)

कटिः, पुं, स्त्री, (कट्यते वस्त्रादिना व्रियतेऽसौ सर्व्वधातुभ्य इन् इति कट्+इन्।) शरीरावयवविशेषः। काँकालि इति भाषा। तत्पर्य्यायः। कटः २ श्रोणिफलकं ३ श्रोणी ४ ककुद्मती ५। इत्यमरः। २।६।७४॥ श्रोणिफलम् ६ कटी ७ श्रोणिः ८। इति तट्टीका॥ कलत्रम् ९ कटीरम् १० काञ्चीपदम् ११। इति हेमचन्द्रः। करभः १२। इति जटाधरः॥ अत्र पूर्व्वदयं कटिपार्श्वः। इति भरतः॥ (यथा, भागवते। ३।१५।२०।

"येषां बृहत् कटितटाः स्मितशोभिमुख्यः"।
कृष्णात्मनां न रज आदधुरुत्स्मयाद्यैः"॥)

कटित्रं, स्त्री, (कटिं त्रायते इति। कटि+त्रै+कः।) रसना। कटिवस्त्रम्। कटिवर्म्म। इति मेदिनीकरहेमचन्द्रौ॥ (यथा भागवते। ६।१६।३०।

"मृणालगौरं शितिवाससं स्फुरत्
किरीटकेयूरकटित्रकङ्कणम्"॥)

कटिप्रोथः, पुं, (प्रोथतीति प्रोथृ+पर्य्याप्तौ पुंसीति घः। कट्याः प्रोथः मांसपिण्डः।) कटिदेशस्थमांसपिण्डम्। गुदपुला पोदेर पेनो इति भाषा। तत्पर्य्यायः। स्फिक् २। इत्यमरः। २।६।७५॥ पूलकः ३ कटीप्रोथः ४। इति रभसः॥ कटिः ५ प्रोथः ६। इति केचित्॥ पूलः ७। इति भरतः॥

कटिरोहकः, पुं, (कटिं हस्तिपश्चाद्भागं रोहतीति। कटि+रुह्+ण्वुल्।) हस्तिपश्चाद्भागरोहकः। इति शब्दमाला॥

कटिल्लकः, पुं, (कटति लतायां प्रकाशते उत्पद्यते वा। कट+बाहुलकादिल्लप्रत्ययः। ततः स्वार्थे कन्।) कारवेल्लः। इत्यमरः। करला इति भाषा॥

कटिशीर्षकः, पुं, (कटिः शीर्षमिव। संज्ञायां कन्।) कटिदेशः। इति हलायुधः॥

कटिशूलः, पुं, (कटिस्थः शूलः शूलरोगः।) कटिदेशस्थशूलरोगः। तस्यौषधं यथा।

"रजनीकदलीक्षारलेपः सिध्मविनाशनः।
कुलत्थ भागमेकन्तु पथ्याभागद्वयं तथा॥
उष्णोदकेन संपीतो कटिशूलविनाशनम्"।

इति गारुड़े १८८ अध्यायः॥

("गुडूच्यारग्वधश्चैव क्वाथमेषां विपाचयेत्।
शुण्ठीचूर्णेन संयुक्तं पिबेज्जङ्घाकटिग्रहे"॥

इति शार्ङ्गधरः॥)

कटिशृङ्खला, स्त्री, (कट्यां धार्य्या शृङ्खला। यद्वा कट्याः शृङ्खला।) किङ्किणी। कटिधार्य्यक्षुद्रघण्टिका। इति हारावली॥

कटिसूत्रं, क्ली, (कट्यां धार्य्यं सूत्रम्। शाकपार्थिवादित्वात् मध्यपदलोपः।) कट्यलङ्कारविशेषः। इति हलायुधः। चन्द्रहार गोट् इत्यादि भाषा॥ (यथा, भागवते। ५।३।४। "स्फुटकिरणप्रवरमणिमयमुकुटकुण्डलकटककटिसूत्रहारकेयूरनूपुराद्यङ्गभूषणविभूषितमृत्विक्सदस्यगृहपतयोऽधना इव"॥)

कटी, [न्] पुं, (कटः गण्डस्थलं प्राशस्त्येनास्त्यस्तीति अस्त्यर्थे इनिः।) हस्ती। इति त्रिकाण्डशेषः॥

कटी, स्त्री (कट्यते कटुरसेषु गृह्यतेऽसौ। कव्यते आव्रियते वस्त्रादिना। सर्व्वधातुभ्य इन्। कटात् श्रोणिवचन इति गौरादिषु पाठाद् वा ङीष्। पा ४।१।४१।) पिप्पली। श्रोणिदेशः। इति मेदिनी॥ (यथा, महाभारते। १। बकबधपर्व्वणि १६४।२७।